# Dhanushkotisetubandhakshetra Mahima Varnanam

# ધનુષ્કોટિસેતુબન્ધક્ષેત્રમહિમવર્ણનમ્

## Document Information

Text title : Dhanushkotisetubandhakshetra Mahima Varnanam

File name : dhanuShkoTisetubandhakShetramahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 28||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# ધનુષ્કોટિસેતુબન્ધક્ષેત્રમહિમવર્ણનમ્

ઈશ્વરઃ -
શ્રૃણુ દેવિ પ્રિયતમે અસ્તિ ક્ષેત્રવરં મમ ।
સેતુબન્ધમિતિ પ્રોક્તં ભુવિ સાક્ષાદ્વિમુક્તિદમ્ ॥ ૧॥

ગન્ધમાદનસઞ્જ્ઞશ્ચ તત્રાસ્તિ ધરણીધરઃ ।
સ તુ લિઙ્ગમયો દેવિ નાનાતીર્થમયો હિ સઃ ॥ ૨॥

બિલ્વામલકહિન્તાલલોધ્રસાલવનાવૃતઃ ।
રસાલસુરસામોદચન્દનામોદમોદિતઃ ॥ ૩॥

અન્યશાખિશતોપેતો નાનાવલ્લીવિરાજિતઃ ।
તચ્છૈલશિખરે દેવિ શિવલિઙ્ગાકૃતિસ્ત્વમહમ્ ॥ ૪॥

મધ્યે તચ્છૈલશિખરં દૃશ્યતે લવણાર્ણવે ।
દૂરતો વાપિ શિખરં દૃષ્ટ્વા શિખરિણોઽમ્બિકે ॥ ૫॥

તત્રત્યવાતપોતેન પાપતાપૈર્વિમુચ્યતે ।
નિવસામિ ત્વયા ગૌરિ સદા ગણવરૈર્વૃતઃ ॥ ૬॥

નામ્નાઽહં ભૂધરે તસ્મિન્ગન્ધમાદન ઈશ્વરઃ ।
તત્ર શૈવવરા નિત્યં નિવસન્તિ શુભાનને ॥ ૭॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ ભસ્મોદ્ધૂલિતવિગ્રહાઃ ।
અનન્તરુદ્રાક્ષકૃતકિરીટેન વિરાજિતાઃ ॥ ૮॥

રુદ્રાક્ષહારવલયબાહુકઙ્કણભૂષિતાઃ ।
ત્રિપુણ્ડ્રનિટિલાઃ સર્વે તૃણીકૃતજગત્ત્રયાઃ ॥ ૯॥

પઞ્ચાક્ષરપરા નિત્યં પઞ્ચાસ્યધ્યાનતત્પરાઃ ।
રુદ્રાધ્યાયાર્થવિજ્ઞાનતજ્જપપ્રવણાઃ સદા ॥ ૧૦॥

શિવલિઙ્ગાર્ચનપરાસ્ત્રિકાલં બિલ્વપત્રકૈઃ ।

સદાન્નપાનવિમુખા શિવનામૈકજીવનાઃ ॥ ૧૧॥

સ્કન્દનન્દીશ્વરમુખામરેશ્વરગણેશ્વરાઃ ।
તત્ર માં બિલ્વપત્રૈશ્ચ ગન્ધમાદનશઙ્કરમ્ ॥ ૧૨॥

પૂજયન્તિ સદા ભક્ત્યા વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
સ્તુવન્તિ સ્તુતિભિર્નિત્યં માં સદા લિઙ્ગરૂપિણમ્ ॥ ૧૩॥

—

દેવર્ષિગણેન્દ્રાઃ -
સંસારદર્પોદ્ધૃતસર્પદષ્ટા જના ન જાનન્તિ મહેશ્વરં ત્વામ્ ।
તે વૈ મહાકામવિષપ્રદિગ્ધા દગ્ધા મહામૃત્યુમુખાગ્નિમધ્યે ॥ ૧૪॥

સન્તપ્તભ્રષ્ટતપ્તાઃ શિવનતિવિમુખાશ્છિન્નહસ્તાસ્ત્વદર્ચા-
    હીના વિચ્છિન્નમસ્તા ભગવતિ ગિરિશે પ્રક્રમે પઙ્ગવો યે ।
ત્વન્નામોચ્ચારણે યે પ્રતિદિનમસકૃન્મૂકભાવં પ્રપન્ના-
    સ્ત્વલ્લિઙ્ગેક્ષાવિહીના યમભટપટલીદણ્ડખણ્ડ્યા ભવન્તિ ॥ ૧૫॥

—

એવં સ્તુવન્તિ માં તત્ર મુનિદેવગણા ગણાઃ ।
તત્ર લિઙ્ગાન્યનન્તાનિ સુરર્ષિસ્થાપિતાન્યુમે ॥ ૧૬॥

તીર્થાનિ ચૈવ પુણ્યાનિ સ્નાતૃણાં મુક્તિદાનિ હિ ।
દક્ષિણામ્ભોનિધેઃ કોટિઃ પિનાકધનુષા મયા ॥ ૧૭॥

ત્રિપુરાંસ્તાંસ્તદા હત્વા મદ્ધનુઃકોટિદેશતઃ ।
દક્ષિણાબ્ધૌ તદા રેખા કૃતા લીલાર્થમમ્બિકે ॥ ૧૮॥

તદ્ધનુષ્કોટિરિત્યાખ્યાં ગમિતં તીર્થમુત્તમમ્ ।
ષટ્ષષ્ટિકોટિતીર્થાનિ સ્વાઘતાપનિવૃત્તયે ॥ ૧૯॥

તત્ર સ્નાન્તિ મહાદેવિ તદા લવણસાગરે ।
બ્રહ્મવિષ્ણ્વાદયો દેવાઃ શક્રાદ્યા મરુતાં ગણાઃ ॥ ૨૦॥

મુનીનાં કોટયો દેવિ સ્નાત્વા તત્ર દિવં ગતાઃ ।
બ્રહ્મહત્યાદિપાપાનાં શોધકં તીર્થમુત્તમમ્ ॥ ૨૧॥

મયૈવં ધનુષઃ કોટ્યા કૃતં લોકહિતાય વૈ ।
સ્નાતાના તત્ર દેવેશિ મદ્જ્ઞાનં પરમં ભવેત્ ॥ ૨૨॥

બ્રહ્મણાપિ પુરા કન્યા નિર્મિતાઽઽસીત્ તિલોત્તમા ।
તાં તદા ચકમે કામાત્ તયા સ મિથુનં ગતઃ ॥ ૨૩॥

તદા પાપનિવૃત્ત્યર્થં સ્નાત્વા તત્ર મહોદધૌ ।
દૃષ્ટ્વાઽભિપૂજ્ય માં બિલ્વૈસ્તતઃ શુદ્ધશ્ચતુર્મુખઃ ॥ ૨૪॥

ઈશાનોઽપિ પુરા ગૌરિ હૃત્વા બ્રહ્મશિરસ્તદા ।
મમ નિન્દાકરં ક્રોધાદ્બ્રહ્મહત્યા(?)મવાપ સઃ ॥ ૨૫॥

સ ચાપિ ધનુષઃ કોટૌ સ્નાત્વા પૂતશ્ચ કિલ્બિષાત્ ।
શક્રોઽહત્યાં પુરા ગત્વા સ્નાત્વા પાપૈર્વિમોચિતઃ ॥ ૨૬॥

અગ્નિશ્ચ સર્વભક્ષોત્થપાપૈઃ સ્નાત્વા વિમોચિતઃ ।
વરુણોઽપિ મહારોગપીડિતો મુનિશાપતઃ ॥ ૨૭॥

સ્નાત્વાત્ર ધનુષઃ કોટૌ રોગાન્મુક્તોઽભવચ્છિવે ।
દક્ષશપ્તશ્ચન્દ્રમાપિ સ્નાત્વા પાપૈર્વિમોચિતઃ ॥ ૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ધનુષ્કોટિક્ષેત્રમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૮॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 28..

Notes:
Shiva describes the merits of worshipping the Shiva Linga at Mount Gandhamadana, and bathing at Setubandha Dhanushkoti Kshetra.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Dhanushkotisetubandhakshetra Mahima Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*